International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 117-119
© 2026 IJMH
www.themultijournal.com
Received: 02-02-2026
Accepted: 20-02-2026
Publish : 21-02-2026

**गोविन्दबल्लभपाण्डेय:**
शोधच्छात्र:,
सोबन सिंह जीना विश्वविद्यालय:,
अल्मोड़ा,उत्तराखंड

**Correspondence:**
**गोविन्दबल्लभपाण्डेय:**
शोधच्छात्र:,
सोबन सिंह जीना विश्वविद्यालय:,
अल्मोड़ा,उत्तराखंड

# भारतीयसंस्कृतज्ञानपरम्परायां लिपिज्ञान-परम्परा

**गोविन्दबल्लभपाण्डेय:**

## परिचय:

सृष्टेः उत्पत्यानन्तरं यथा-यथा मनुष्याणां तर्कक्षमतायाः विकासो सम्भूतः। तथा-तथा तेषां मनसि सृष्टि-जीव-जन्म-मृत्यु मोक्षेश्वरादि - विषयकाः प्रश्नाः समुद्भूताः तेषां उत्तररूपेण अनुसन्धानस्य परम्परा प्रचलिता अथवा परम्परा प्रादुर्भूता । एतस्मिन् एव उपक्रमे ज्ञानराशेः संक्रमणं गुरुशिष्य परम्परा माध्यमेन सञ्जातम् । कालान्तरे लेखनरूपेण सा ज्ञानराशिः ग्रन्थेषु लिपिबद्धो बभूव ।

भारतम् बहुभाषा-भाषी देशः भारते लेखनार्थं बहुविधयः लिपयः प्रयुज्यन्ते । एताः लिपयः बहुविध साम्यता युक्ताः सन्ति । सर्वाषां लिपीनां वर्णाकृतिः एका अत्यन्तं तर्कपूर्णा ध्वन्यात्मक क्रमे व्यवस्थिता वर्तते । अस्मिन् विषये अन्ताराष्ट्रिय ध्वन्यात्मक संघः (IPA)[1] ध्वन्यात्मक लिपेः निर्माणार्थं स्वीकृतम् ।

भारते लेखनस्य उद्भव विषये धार्मिकाः वदन्ति ब्रह्मणा सर्वप्रथमं यस्यां लिप्यां लेखनं कृतं सा लिपिः ब्राह्मी लिपि रूपेण जायते (स्वीक्रियते)।

## लिपिनां भेदा:

सम्पूर्णविश्वे लिपीनां अशीतिः भेदा:[2] प्राप्यन्ते परं प्राचीनकाले भारते द्विधा लिपीनां वर्णनं मिलति - ब्राह्मी खरोष्ठी च । ब्राह्मी वामत: दक्षिणं प्रति, खरोष्ठी दक्षिणतः वामं प्रति लिख्यते । प्रायशः पश्चिमोत्तर प्रान्तेषु खरोष्ठी लिपे: प्रचार प्रसारश्च आसीत् अपरा प्रचीन भारतस्य अभिलेखेषु सर्वाधिक प्रयुक्ता लिपिः ।

अशोकस्य शिलास्तम्भा:/लेखा: वा , अपि स्पष्टीकुर्वन्ति भारतस्य लेखनकलाया: ई० पू० चतुर्थ शताब्द्यां यावत् लेखनकलाया: लिपिकालायाश्च विकासं जातम् । ह्वेनसांग महोदयः अपि भारते लेखन कलायाः प्रारम्भः ब्रह्मातः स्वीकरोति ।

अन्ये प्राचीन यूनानयात्रिणः अपि ई॰पू॰ चतुर्थ शताब्द्यां भारते कर्गदस्य लेखनकलायाः च सम्यक् ज्ञानमासीत् इति स्वीकुर्वन्ति बौद्धवाङ्मयानुसारं ई॰पू॰ 400 शताब्द्यां एवं च ई॰ पू॰ षष्ठमशताब्द्यां यावत् सम्यक् ज्ञानम् आसीत् इति मन्यन्ते।

स्वयं पाणिनेः धातुपाठे लिपि इत्यस्य कृते “लिप् उपदेहे” धातुरस्ति[3]।

डॉ गौरीशङ्कर हीराचन्द्र ओझा महोदयेनापि शास्त्रीय ग्रन्थानां आधारेण सिद्धं कृतम् यत् पाणिनि एवं च यास्काचार्यात् पूर्वमपि भारते लेखनकलायाः विकास: जात: तथा-च लिखित ग्रन्थाः अपि आसन्[4]।

## लिपेः विकासक्रमः -

उपदेशात्मकरूपेण - श्रुतिपरम्परया च ।

लिखित रूपेण चित्रात्मकं >वर्णात्मकं >शब्दात्मकं वाक्यात्मक च।

प्रबन्धनात्मक दृष्ट्या - प्रकीर्णं > संकलनात्मक >पोथी >पुस्तकं >ग्रन्थ।

प्रकाशन दृष्ट्या - हस्तलिखितं >टंकितं >संशोधितं >अन्तिमरुपश्च।

सूचना प्रौद्योगिक दृष्ट्या - सूचनात्मकं (SMS) ई-मेल द्वारा अणु माध्यमेन अन्तर्जालमाध्यमेन च।

पुनः प्रकाशन दृष्ट्या।

**पाण्डुलिपेः मूलप्रकाराणि -**

विषय दृष्ट्या - शासकीयं (सर्वकारीयं) लौकिकश्च।

लिप्यासनदृष्ट्या - कोमलकठोरौ।

आकार दृष्ट्या - गण्डी / कच्छपी / मुष्टी / सृपाटिका / कुण्डलिलम्।

लेखनशैलीदृष्ट्या-पाठशैली, पडिमात्रा, फुदड़ी, त्रिकोण, चित्रसज्जा विषयानुसारं चित्रावलि युक्ता

विविधवर्णैः (रंगैः) युक्ता च।

सम्पादन दृष्ट्या - संशोधितम् अशंशोधितश्च।

**विभिन्न साक्ष्यानि -**

ब्राह्मी नाम्नैव अस्य उत्पत्तिः ब्रह्मणतः स्वीकुर्वन्ति जनाः। बादामी माध्यमेन 580 ई. एकं पाषाणखण्डं प्राप्तम् तस्योपरि ब्रह्मणः मूर्तिः एवञ्च हस्तलिखित लेखनकलायाः संकेतं प्राप्यते। एकोनविंशति (11) शताब्द्यां प्राप्त लेखेषु मोहनजोदडो सिन्धु सभ्यतायाः उद्घाटनं जातम्। अस्याधारेण महामहोपाध्याय पं. गौरीशंकर हीराचन्द्र ओझा[5] एवं पण्डित राजबली पाण्डेय आदि विद्वान्सः आसाधारण लेखन कलायाः विकासः 5000 ई० पू० पूर्वं स्वीकुर्वन्ति।

पुराकाले ऋषिमहर्षयः जनकल्याणाय तत्त्व चिन्तने प्रकृतितत्वानां सूक्ष्मचिन्तनमग्नाः भवन्ति स्म। तथा जनेभ्यः ज्ञानस्य संक्रान्तये स्वचिन्तनं लिपिबद्धं कुर्वन्ति स्म। ग्रन्थरचना समये केचन् आचार्याः लेखन सामग्रयाः सन्दर्भान् निर्दिशन्ति।

तत्र महाकविकालिदासेन निर्दिष्टम्

**तव न जाने हृदयं मम पुनः कामो दिवापि रात्रावपि।**
**निर्घृण तपति बलीयस्त्वयि वृत्तमनोरथान्यङ्गनि॥**[6]

परम्परागत भारतीयानां मान्यतानुसारं ब्राह्मीलिपेः आद्यप्रवर्तकः ब्रह्मा अस्ति तेन निर्मिता अनया अस्य ब्राह्मी नाम सार्थकः। अन्यामतानुसारेण - प्रथमेन तीर्थङ्करेण ऋषभदेवेन स्व पुत्र्या (ब्रह्मी) इत्यस्याः लेखनार्थं ऋषभदेवेन या लिपिः स्वीकृता सा ब्राह्मी लिपि उच्यते। भारतवर्षे लेखनकलायाः उद्भवस्य सम्बन्धे मुख्य-रूपेण साधनद्वयस्य विचारम् अपेक्षितं भवति।

प्रथमः विचारः

**"ब्राह्मी तु भारती भाषा गीर्वाण्वाणी सरस्वती"**[7]

अमरसिंहेन ब्राह्मी पदस्य व्यापक दृष्ट्या संकेतः विहितः ब्राह्मी पदेन सरस्वत्याः अभिधानं क्रियते। परं आधुनिक इतिहासवेत्तारः अत्र आस्थावन्तः न दृश्यन्ते। भारते तु प्रायशः सर्वे विद्वान्सः मन्यन्ते सृष्टेः प्रारम्भतः एव लेखनकलायाः समुद्भवो भारते अभूत् आधुनिक पाश्चात्य विद्वद्भिः नायं पक्षः स्वीक्रियते। तेषां मते प्रथम शताब्द्यां चीनदेशे सर्वप्रथमं कर्गदस्य निर्माणं अभूत्। ततः पूर्वं भारतवासिनां लेखनस्य ज्ञानं नासीत्।

भारतवर्षे पूर्वतः एव जनाः कर्गदस्य निर्माणार्थं कार्पासस्य उपयोगं कुर्वन्ति स्म। तस्मिन् कर्गदे लिखन्ति च। मैक्समूलर पाणिनेः ई० पू० चतुर्थ- पञ्चम शताब्दिपूर्व पर्यन्तं लिपेः अभावः भारते स्वीकरोति श्रुति परम्परायाः कारणत्वात् बर्नेल महोदयः फिनिशि-यात लिपितः एव योरोपीयानां लिपीनां विकासः स्वीकरोति स्म। ब्यूलर महोदयानुसारं ब्राह्मी लिपिः भारतस्य प्रथमा लिपिः अस्योपत्तिः 'सामी" (सेमेटिक) लिपीतः जाता इति[8]। अस्य समयः ई० पू० 800 शताब्दी स्वीकृतम्।

कालिदासस्य समयः ई० पू० प्रथमतः-चतुर्थशताब्दीमध्ये स्वीक्रि-यते ततः कालिदासस्यापि समये भारते लेखन कालायाः विकासो आसीत्। एवमेव मृच्छकटिकम् ग्रन्थेपि शूद्रकेन लिम्पिधातोः[9] प्रयोगो विहितः।

कालिदासेन अन्यस्मिन् श्लोके लेखनसम्बन्धि उल्लेखः विहितः -

**न्यस्ताक्षराधातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः।**
**ब्रजन्ति विद्याधर सुन्दरीणाम् नङ् लेख क्रिययोपयोगम्॥**[10]

संस्कृतवाङ्मयस्य बृहत्तम ग्रन्थेषु अन्यतमः शतसाहस्त्री संहितया विभूषितः महाभारतः तेष्वेव विभिन्नानि साक्ष्यानि उपस्थिताः भवन्ति।

**"व्यासविरचिता गणेश लिखिता महाभारते पुण्यकथा"**

इत्युक्तिः प्रसिद्धाएव।

अतः तस्मिन् एव समये लेखन कला भारते पूर्णा विकसिता आसीत् लौकिकसंस्कृतस्य आदिमः ग्रन्थः रामायणः, रामायणेऽपि लेखन विषयकः उल्लेखो प्राप्यते।सुन्दरकाण्डे यदा हनुमतः सीताया : अन्वेषणार्थं लंकाम्प्रति गतवान् तदा अशोक वाटिकायां सीतां रामनाम् अङकितं मुद्रिकां (अङ्गुलीयकं) दत्तवान्।

**वानरोहं महाभागे दूतो रामस्य धीमतः।**
**रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम्॥**[11]

**लिपेः तत्त्वानि**

लिपौ द्वौ अनिवार्य तत्त्वौ स्तः[12]

1 आधारसङ्केत: 2 प्रयोगविधिश्च

**लिपिज्ञानस्य प्रभाव:**

लिपिज्ञानस्य अध्ययन: मध्ये समाप्त: जात: परञ्च जेम्स प्रिसेप महोदयेन अष्टादश शताब्द्यां सम्राट् अशोकस्य अभिलेखानां पाठ: कृत: तदनन्तरं तेन एका पाठभेदा सरणि:[13] अपि निर्मिता तदनु एका क्रान्ति: जाता अनैकै: ग्रन्थानां प्रचलित देवनागरीलिप्यां लिप्यन्तरणं विद्वद्भि: विहित: तेन व्याकरण-ज्यौतिष-साहित्य-दर्शन ग्रन्थै: सह परिचय: अनुद्भूतज्ञानराशि: उद्भूताश्च जाता।

**निष्कर्ष:**

अतः विभिन्न साक्ष्यानां विश्लेषणेन वक्तुं शक्नुमः भारते दक्षिणत: वामं प्रति वामत: दक्षिणं प्रति लिपी लिख्येते ।श्रुति परम्पराया: आधिक्येन अष्टादशशताब्द्यात् प्राक् लिपीनां ज्ञानस्य ह्रास: संजात: परंच प्रिसेप ,ओझा,हार्नले,ब्यूलर,हुल्स इत्यादय: विद्वांस: महता परिश्रमेण पुन: लिपिपठने साफल्यम् प्राप्नुवन्त: येन भारतीय-ग्रनथानां ज्ञान: जनसुलभ: अभवत् ।सम्प्रति भारते एव अनेके लिपय: प्रचलिता: यथा शारदा,देवनागरी,गुरुमुखी,ग्रन्थलिपि,ओडि-या लिपि: च परं सर्वेषां मूले तु ब्राह्मीखरोष्ठी स्त: ।

**पादटिप्पणी**

1. https://en.wikipedia.org/wiki/International_Phonetic_Alphabet
2. भारतीय पुरालिपि शास्त्र ब्यूलर जार्ज
3. वैयाकरणसिद्धद्धांतकौमुदी पाणिनीय धातुपाठ : तुदादि गणे पृष्ठ 325
4. भारतीय लिपिमाला डॉ ओझा गौरी शंकर हीराचन्द्र पृष्ठ संख्या 13-20
5. भारतीय लिपिमाला डॉ ओझा गौरी शंकर हीराचन्द्र पृष्ठ संख्या 4 भूमिका
6. अभिज्ञानशाकुन्तलम् कालिदास; अङ्क 3-13
7. अमरकोश सिंह:अमर:
8. Indian paleography Buhler .G year 19:11:1959 page no. 10
9. मृच्छकटिकं शूद्रक
10. कुमारसम्भवम् कालिदास:
11. वाल्मीकि रामायण: सुन्दरकाण्डे 34.2
12. नागिरी लिपि का उद्भव और विकास
13. Modifications of the sanskrit alpha bet